**S 1508**

Sl. No.

# SSLC EXAMINATION, MARCH - 2020

## SANSKRIT

First Language - (Academic & Oriental) Paper I

Time : 1½ Hours

Total Score : 40

निर्देशा: -

- 15 निमेषा: समाश्वासकाल:, कालोऽयं प्रश्नानां वाचनायउत्तराणाम् आसूत्रणाय च उपयोक्तव्य: ।
- प्रश्नान् प्रश्ननिर्देशान् च सम्यग् अवगम्य एव उत्तराणि लेखनीयानि।
- उत्तरलेखने मूल्याङ्का:, काल: च परिगणनीया: ।
- विवर्तन प्रश्नात् ऋते सर्वेषां प्रश्नानां उत्तरलेखने देवनागरीलिपि: उपयोक्तव्या।

Score

1. चतुर्णां समुचितमुत्तरं कोष्ठकात् चित्वा लिखत। 4x1=4

(क) "स्वराज्यम् अस्माकं जन्माधिकार एव"
कस्य वचनमिदम्?
[महात्मागान्धिन:, डा. एस्. राधाकृष्णस्य बालगङ्गाधरतिलकस्य, डा. राजेन्द्रप्रसादस्य]

(ख) पि.सि. देवस्य महाशयेन विरचितं महाकाव्यम् किम्?
[केरलोदयम्, क्रिस्तुभागवतम्, विशाखविजयम्, शङ्करदिग्विजयम्]

(ग) 'दीनवत्सला जननी' इति कथांश: कस्मात् ग्रन्थात् उद्धृत: ?
[महाभारतात्, रामायणात्, हितोपदेशात् पञ्चतन्त्रात्]

(घ) त्यागरजस्वामिनं द्रष्टुमागत: केरलीयसंगीतज्ञ: क: ?
[श्यामशास्त्री, षट्कालगोविन्दमारार्, मुत्तुस्वामिदीक्षित:, स्वातितिरुनाल्]

(ङ) किं गणे नान्तर्भवति ?
[बलीवर्द:, ऋषभ:, वासव:, वृष:]

2. यथोचितं पट्टिकां पूरयत। 4x1=4

| | कृति: | कर्ता | विभाग: |
|---|---|---|---|
| उदा – | कनकधारास्तवम् | श्रीशङ्कर: | स्तोत्रग्रन्थ: । |
| | शङ्करदिग्विजयम् | माधवविद्यारण्यस्वामिन: | ________ । |
| | अभिज्ञानशाकुन्तलम् | ________ | नाटकम् । |
| | ________ | सुरपाल: | शास्त्रग्रन्थ: । |
| | शिशुपालवधम् | ________ | महाकाव्यम् । |

P.T.O.

Score

3. उदाहरणानुसारं पदच्छेदं लिखत। 1x1=1

उदा - कुर्वन्नासीत् - कुर्वन् + आसीत्।

पचन्नासीत् - ________ + ________।

4. अधोदत्तवाक्यात् सम्बोधनपदं चित्वा लिखत। 1x1=1

हे कमले! अस्याः दारिद्रयम् अपनय।

5. उदाहरणानुसारं विग्रहवाक्यं लिखत। 1x1=1

उदा - तरुमहिमा - तरोः महिमा।

गुरुमहिमा - ________।

6 - 10 प्रश्नेभ्यः **चतुर्णाम्** उत्तराणि लिखत। 4x2=8

6. अधोदत्तं वाक्यं पठित्वा शतृशानजन्तौ विविच्य लिखत।

अविद्यायां वर्तमानः नरः स्वयं पण्डितः इति विचिन्तयन् भवति।

शत्रन्तम् - ________।

शानजन्तम् - ________।

7. सूचनानुसारं गद्यक्रमं लिखत।

आत्मानमेव मन्येत

कर्तारं सुखदुःखयोः।

तस्माच्छ्रेयस्करं मार्गं

प्रतिपद्येत न त्रसेत्।।

**सूचनाः** - सुखदुःखयोः ________ आत्मानमेव ________।

तस्मात् ________ मार्गं प्रतिपद्येत न ________।

8. उदाहरणानुसारं पट्टिकां पूरयत।

| | लट् | विधिलिङ् |
|---|---|---|
| उदा - | लिखति | लिखेत् |
| | भवति | ________ |
| | ________ | वदेत् |

9. उदाहरणानुसारं 'यदा-तदा' उपयुज्य वाक्यं परिवर्तयत।

उदा - त्वं प्रार्थयसे। अन्येषां दर्शनार्थं मा कुरु।

यदा त्वं प्रार्थयसे तदा अन्येषां दर्शनार्थं मा कुरु।

जलोपप्लवः आयाति। जनाः कष्टम् अनुभवन्ति।

Score

10. अधोदत्तं वाक्यं पठित्वा क्त्वान्त - तुमुन्नन्त पदे चित्वा लिखत।

त्यागराजस्य वैभवं ज्ञात्वा शरभोजी तं द्रष्टुम् ऐच्छत्।

क्त्वान्तम् -

तुमुन्नन्तम् -

11 - 13 प्रश्नेभ्य: द्वयो: उत्तरे लिखत। 2x4=8

11. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत।

इमामहं वेद न तावकीं धियं
विचित्ररूपा खलु चित्तवृत्तय:।
विचिन्तयन्त्या भवदापदं परां
रुजन्ति चेत: प्रसभं ममाधय:।।

(क) चित्तवृत्तय: कीदृश्य: भवन्ति ?

(ख) एकं क्रियापदं चित्वा लिखत।

(ग) आधय: किं रुजन्ति ?

(घ) मन: इत्यर्थे प्रयुक्तं पदम्।

12. सम्भाषणांशान् पूरयत।

| | | |
|---|---|---|
| बालक: | - | नमस्ते आचार्य। |
| आचार्य: | - | __________ बालक! किमर्थम् आगतवान्? |
| बालक: | - | व्यायामस्य __________ ज्ञातुम् आगच्छम्। |
| आचार्य: | - | व्यायामस्य प्राधान्यं ज्ञातुं वा? किं किं ज्ञातुमिच्छसि? |
| बालक: | - | __________ कथं करणीय:? |
| आचार्य: | - | व्यायाम: सावधानं करणीय:। |
| बालक: | - | व्यायामेन किं लभ्यते? |
| आचार्य: | - | व्यायामेन __________ लभ्यते। |
| बालक: | - | धन्यवाद:। |

13. खण्डिकां पठित्वा प्रश्नानां उत्तराणि लिखत।

केरले प्रशस्त: नाटककार:, अध्यापक:, संस्कृतपण्डित: च आसीत् पण्डिट्ट् के.पि. करुप्पन् महाशय:। स: 1885 तमे वर्षे मेय् 24 दिनाङ्के एरणाकुलं जिल्लाया: चेरानेल्लूर् ग्रामे भूजात:। तस्य माता 'कोच्चुपेण्ण्', पिता पाप्पु च। लङ्कामर्दनं, शाकुन्तलं वञ्चिप्पाट्ट्, विलापगीतं जातिकुम्मि इत्यादय: तस्य प्रसिद्धा: ग्रन्था:। केरलवर्मवलियकोयित्तम्पुरान् 'विद्वान्' पुरस्कारेण, कोच्चिमहाराज: 'कवितिलकम्' इति पुरस्कारेण च एतं समादृतवन्तौ। समाजस्य प्रगत्यै प्रयतितवान् अयं 1938 तमे वर्षे मार्च् 23 दिनाङ्के दिवङ्गतोऽभूत्।

(क) पण्डिट्ट् के.पि. करुप्पन् कुत्र भूजात: ?

(ख) तस्य पितरौ कौ ?

(ग) तस्य प्रसिद्धा: ग्रन्था: के ?

(घ) कोच्चिमहाराज: केन पुरस्कारेण एतं समादृतवान् ?

Score

14. प्रादेशिक भाषायां विवर्तयत। 1x5=5

नाट्यविद्याम् अधिकृत्य विरचितः प्रथमो ग्रन्थः भवति भरतमुनेः नाट्यशास्त्रम्। चतुष्षष्टिकलाः तस्मिन् वर्णयति। तथापि नृत्त, गीतं, अभिनयः इति त्रयं प्रधानतया प्रतिपादयति। नाट्यशास्त्रे षट्त्रिंशत् (36) अध्यायाः सन्ति। के.पि. नारायणपिषारटिमहाशयः कैरल्यां अस्य अनुवादं (विवर्तनं) कृतवान्।

15 - 17 प्रश्नेभ्य द्वयोः उत्तरे लिखत। 2x4=8

15. वृक्षायुर्वेदे प्रतिपादितान् सस्यप्रभेदान् अधिकृत्य सूचनाः उपयुज्य लघुविवरणं लिखत।

सूचनाः - तरुमहिमा - भूमिनिरूपणम् - सस्यविज्ञानम् - चतुर्धा - लतारूपः - अव्यक्तपुष्पः - वीरुत् - व्रीहीगोधूमादयः।

16. सूचनानुसारं जीवनचरितं लिखत।

| | | |
|---|---|---|
| नाम | : | वयलार् रामवर्मा। |
| जन्म | : | 1928 मार्च् 25, आलप्पुष़ चेर्त्तला देशः। |
| पितरौ | : | केरलवर्मा, अम्बालिका च। |
| प्रशस्तिः | : | कविः, कैरलीगानरचयिता। |
| पुरस्काराः | : | 1961 केरलसाहित्य अक्कादमी पुरस्कारः। |
| | | 1974 गानरचनायां राष्ट्रीयपुरस्कारः। |
| देहवियोगः | : | 1975 ओक्टोबर् 27 दिनाङ्के। |

17. सूचनानुसारं 'अभिज्ञानशाकुन्तलम्' अधिकृत्य लघुविवरणं लिखत।

सूचनाः - कविकुलगुरुः - महाभारतात् - इतिवृत्तं - सप्ताङ्काः - शृङ्गारः - चतुर्थोऽङ्कः - प्रकृतिस्नेहः - पुरुवंशराजा - शकुन्तला।

- o0o -